Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 07

**P–95–Sanskritam - II**

यहाँ से काटिए

# प्रवेशिका परीक्षा, 2020

## संस्कृतम्

## (द्वितीय – प्रश्नपत्रम्)

**समय** : 3¼ **होराः**

**पूर्णांक** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः।

यहाँ से काटिए

**(गद्य – भागः)**

**अतिलघूत्तरात्मकाः प्रश्नाः**

1) कम्बुग्रीवः कः आसीत्? [1]

2) महिलारोप्यं नाम नगरं कुत्र अस्ति? [1]

3) षण्मासे – षण्मासे एकैकं पिच्छं के परित्यजन्ति? [1]

4) सिंही कति पुत्रम् अजीजनत्? [1]

5) शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ कुत्र निवसतः स्म? [1]

**लघूत्तरात्मकाः प्रश्नाः**

6) कच्छपस्य मित्रे के? [2]

7) ताम्रचूडो परिव्राजकः कुत्र प्रतिवसति स्म? [2]

8) बृहत्पक्षी राज्ञः शरणं गत्वा किम् अब्रवीत्? [2]

9) अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसंग–व्याख्या कार्या – [1+4=5]

(क) ततस्तद्दुःखदुःखितौ तावूचतुः – भो मित्र! जम्बालशेषमेतत्सरः सञ्जातं, तत्कथं भवान् भविष्यतीति व्याकुलत्वं नो हृदि वर्तते। तच्छ्रुत्वा कम्बुग्रीव आह – 'भो! साम्प्रतं नाऽस्त्यस्माकं जीवितव्यं, जलाऽभावात्।

(ख) अथ कदाचित् तत्र वने भ्रमन्नरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन श्रृगालपुत्रेणात्राभिहितम् –'अहो गजोऽयं युष्मत्कुलशत्रुः। तन्न गन्तव्यमेतस्य अभिमुखम्।'

10) अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसंगव्याख्या कार्या – [1+4=5]

(क) तदाकर्ण्याऽहं (हिरण्यकः) सकलयूथपरिवृतः तत्र गतः। उत्पत्य च तस्मिन् भिक्षापात्रे समारूढः। तत्र भक्ष्यविशेषाणि सेवकानां दत्त्वा पश्चात्स्वयमेव भक्षयामि। एवं नित्यमेव तदन्नं भक्षयामि।

(ख) तत्तावत्तेषामागमनमपि न सम्पत्स्यते। भविष्यति वा, तर्हि त्वां बुद्धिप्रभावेण आत्मसहितं रक्षयिष्यामि। यतोऽनेकां सलिलगतिचर्यामहं जानामि। तदाकर्ण्य शतबुद्धिराह –'भो युक्तमुक्तं भवता। सहस्रबुद्धिखे भवान्।'

11) एकस्याः कथायाः सारांशः संस्कृतभाषायां लेखनीयः। [4]

(क) हिरण्यकताम्रचूडकथा

(ख) स्वर्णहंस – स्वर्णपक्षिराजकथा

## (पद्य भागः)

### अतिलघूत्तरात्मकाः प्रश्नाः

12) आत्मानं कानि न छिन्दन्ति? [1]

13) कीदृशी भूमिः नानाफलं फलति? [1]

14) कैकेयी कस्य अभिषेचनम् इच्छति स्म? [1]

15) 'विवेकानन्दविजयम्' इति नाम्नि नाटके कस्य चरितं वर्णितम् अस्ति? [1]

16) गुरूदक्षिणायै महर्षिः वरतन्तुः कियद् धनम् आनेतुम् आदिष्टवान्? [1]

### लघूत्तरात्मकाः प्रश्नाः

17) सात्विक – आहारस्य स्वरूपं लिखत। [2]

18) करूणाकुलानां श्रोत्रं केन विभाति? [2]

19) विवेकानन्दस्य शब्दे शब्दे पादे पादे च का आसीत्? [2]

20) गुरूदक्षिणार्थी कः? [2]

21) जगति पुण्यकृत किं लभन्ते? [2]

22) अधोलिखितेषु द्वयोः पद्ययोः सप्रसंग – व्याख्या कार्या – [1 + 2 × 2 = 6]

(क) न जायते म्रियते वा कदाचि–

न्नायं भूत्वा भविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे।।

(ख) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।

मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ।।

(ग) प्रातः प्रयाणाभिमुखाय तस्मै,

सविस्मयाः कोषगृहे नियुक्ताः।

हिरण्मयीं कोषगृहस्य मध्ये,

वृष्टिं शशंसुः पतितां नभस्तः।।

23) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्गभावार्थः लेख्यः – [1 + 3 = 4]

(क) विपदि धैर्यमथाभ्युदये क्षमा,

सदसि वाक्पटुता युधि विक्रमः।

यशसि चाभिरतिर्व्यसनं श्रुतौ

प्रकृतिसिद्धमिदं हि महात्मनाम्।।

(ख) पुरा देवासुरे युद्धे पिता ते मम राघव।

रक्षितेन वरौ दत्तौ सशल्येन महारणे।।

## छन्द – अलंकार – कोष – प्रश्नाः

24) अधोलिखितेषु छन्दःसु द्वयोः लक्षणोदाहरणे लिखत – [1 + 1½ × 2 = 5]

(क) वसन्ततिलका

(ख) हरिणी

(ग) शार्दूलविक्रीडितम्

25) द्वयोः अलंकारयोः लक्षणोदाहरणे लिखत – [1 + 1½ × 2 = 5]

(क) उपमा

(ख) अनुप्रासः

(ग) विशेषोक्तिः

26) अधोलिखित–कोष–प्रश्नाः समाधेयाः – [1 + 4 = 5]

(क) पशुपतिः कः अस्ति?

(ख) अधोलिखितानां शब्दानां प्रत्येकं पर्यायद्वयं लिखत।

ब्रह्मा, बुद्धः, बलदेवः, कामदेवः

## शब्दरूप – धातुरूप – रचना – प्रश्नाः

27) निर्देशानुसारं शब्दरूपाणि लिखत। [1 + 1 + 1 + 1 = 4]

(क) बालक – शब्दस्य, चतुर्थीविभक्ति – द्विवचनम्

(ख) पति – शब्दस्य, प्रथमाविभक्ति – एकवचनम्

(ग) जगत् – शब्दस्य, द्वितीयाविभक्ति – बहुवचनम्

(घ) अस्मद् – शब्दस्य, षष्ठीविभक्ति – एकवचनम्

**28)** निर्देशानुसारं धातुरूपाणि लिखत। **[1 + 1 + 1 + 1 = 4]**

(क) अस्–धातु–लट्लकार–प्रथमपुरूष–बहुवचनम्

(ख) कृ–धातु–लोट्लकार–मध्यमपुरूष–एकवचनम्

(ग) नृत्–धातु–लङ्लकार–प्रथमपुरूष–द्विवचनम्

(घ) प्रच्छ्–धातु–लट्लकारस्य, उत्तमपुरूष–एकवचनम्

**29)** कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत। **[4]**

(क) कालिदासः

(ख) भारतीया संस्कृतिः

(ग) स्वच्छता

**30)** भवान् देवकुमारः, राजकीय–प्रवेशिका–संस्कृत–विद्यालय–महावीरनगरस्य छात्रः रूग्णताकारणेन अवकाशाय प्रार्थनापत्रं लिखतु। **[3]**

अथवा

भवान् सीकर–निवासी भवानी अस्ति। भवतः नगरस्य विकासार्थं महापोर–महोदयस्य कृते प्रार्थनापत्रं लिखतु।

DO NOT WRITE ANYTHING HERE